प्रयोग

संस्कृत

क्र. नं. ८८

॥ दशकर्म ॥ (अपूर्ण)

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

३१०

मतबेश्रज्ञानप्रकासमेंछपा

# पुस्तकदशकर्मका लिख्यते

वअक्षरतमा मलालावासुदेव

Project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan

श्रीगणेशायनमः अथगर्भाधानं तत्रऋतुस्नाताचतुर्थदिनेवधूः प्रातस्त्र
ह॰कृ॰ स्नीमादित्यमुपतिष्ठेत ततस्तद्दिनेमातृपूजाभ्युदयिके कृत्वा षोडशरात्राद्र्वाक
प॰२ शुभरात्रौदक्षिणकरेणपतिर्वध्वाउपस्थमपिस्पृश्यजपति ॐपूषाभगॐसवि
तादधातुरुद्रस्त्वष्टारूपाणितेजोवैश्वानरोदधातु इतिमंत्रेण अथवाङ्मुख
उपविष्टउदङ्मुखोवाएतामभिमंत्रयेदनेन ॐगर्भंधेहिसिनीवालीगर्भंधेहि
पृथुष्टुके गर्भंतेअश्विनौदेवावाधत्तांपुष्करस्रजौ इतिमंत्रेण ततः ॐरेतोमूत्रं
विजहातियोनिंप्रविशदिंद्रियं गर्भोजरायुणावृतउल्वंजहातिजन्मना इतिमंत्रे
णरेतःश्रावणं अथतस्याहृदयमालभेत ॐयत्तेसुसीमेहृदयंदिविचंद्रमसि
श्रितंवेदाहंतन्मांतद्विद्यात पश्येमशरदः शतंजीवेमशरदः शतंशृणुया
मशरदः शतमितिमंत्रेण ततस्तस्यांहृष्टमनाः हृदेशोप्रसन्नामनातुरांकामय
मानामभग्नशय्यायांप्रदोषादूर्ध्वंस्त्रियमभिगछेत सायदिगर्भंनदधातितदा
पतिःकृतोपवासः पुष्यनक्षत्रेश्वेतकंटिकारिकामूलमुत्पाद्योदकेनपिष्ट्वावधू २
दक्षिणनासापुटेनतुरसंदध्यात् अनेनैवमंत्रेण ॐइयमोषधीत्रायमाणासह

project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

मनासरस्वतीअस्याअहंत्वहत्यापत्रः पितुरिवनामजाग्रभीमिति इतिगर्भाधानं १
द॰क॰ अथपुंसवनं तत्रगर्भमासापेक्षयाद्वितीयतृतीययोरन्यतरस्मिन्करणीयं पुष्यपु
३ नर्वसुमृगशिरोहस्तमूलश्रवणान्यतमपन्ननक्षत्रयुतोभयचंद्रतारानुकूल
दिवसमवगत्य ततःपूर्वदिनेवधूमुपवासंकारयित्वा अग्निमद्दिनेतस्याःस्नात
याअहतांवासोयुगपरिधानानंतरंशुचिःस्नातुःकृताचमनोमातृपूजाभ्युदयिका
दिकृत्वा वटप्ररोहंवटशृंगांश्चआचारात् कुशकंटिकमपिशिशिरेणजलेनपि
ष्ट्वावधूदक्षिणनासापुटेनतरसंदध्यात् ॐहिरण्यगर्भः समवर्ततेनाग्रेभूतस्य
जातःपतिरेकआसीत् सदाधारपृथिवींद्यामुतेमांकस्मैदेवायहविषाविधेम
ॐअद्भ्यःसंभृतःपृथिव्यैरसाच्चविश्वकर्मणः समवर्त्तताग्रेतस्यत्वष्टाविदध
द्रूपमेतितन्मर्त्यस्यदेवत्वमाजानमग्रे इतिमंत्राभ्यां इतिपुंसवनं २ अथसी
मंतोन्नयनं तत्रगर्भमासापेक्षयाषष्ठेष्टमेवापन्नामनक्षत्रयुक्तचंद्रतारानु ३
कूलविदितदिनेमातृपूजाभ्युदयिकादिकृत्वा वहिःशालायांकुशंडिकांकुर्यात

द.क.
५

तत्रक्रमः कुशात्रयेणहस्तपरिमितचतुरस्रभूमिंपरिसमुह्यकुशानैशान्यांनिःक्षिप्य
गोमयोदकेनोपलिप्य स्रुवमूलेनस्फ्येनवोत्तरतस्त्रिरुल्लिख्योल्लेखनक्रमेण
नाभिकांगुष्ठाभ्यांमृदमुद्धृत्यवारिणातंदेशमभिषिंच्यकांस्यपात्रेणाग्निमादाय
तत्रप्रत्यङ्मुखंनिदध्यात् ततोब्राह्मणवरणं ॐअद्यकर्तव्यसीमंतोन्नयनहोम
कर्मणिकृताकृतावेक्षणरूपब्रह्मकर्मकर्तुममुकगोत्रममुकशर्माणंब्राह्म
णमेभिःपुष्पचंदनतांबूलवासोभिर्ब्रह्मत्वेनत्वामहंवृणे ॐवृतोस्मीतिप्रति
वचनं ॐयथाविहितंकर्मकुर्वितितेनाभिहिते ॐकरवाणीतिप्रतिवचनानंत
रं अग्नेर्दक्षिणतःशुद्धमासनंदत्वा तदुपरिप्रागग्रान्कुशानास्तीर्यास्मिन्सीमंतो
न्नयनहोमकर्मणित्वंमेब्रह्माभवेत्यभिधाय ॐभवानीतितेनोक्ते अग्निप्र
दक्षिणंकारयित्वाब्रह्माणंतत्रोपवेश्य प्रणीतापात्रंपुरतःकृत्वाजलेनापूर्य
कुशैराछाद्यब्रह्मणोमुखमवलोक्याग्नेरुत्तरतःकुशोपरिनिदध्यात् ततःपरि ५
स्तरणं बर्हिषश्चतुर्थभागमादायाग्नेयादीशानांतंब्रह्मणोग्निपर्यंतंनैर्ऋत्या
द्वायव्यांतं अग्नितःप्रणीतापर्यंतं ततोग्नेरुत्तरतः पश्चिमदिशिपवित्रछेद

Joint property of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan Mumbai

द॰कौ॰ ५

नार्थंकुशत्रयंपवित्रकरणार्थंसाग्रमनंतर्गर्भंकुशपत्रद्वयं प्रोक्षणीपात्रं आज्य
स्थालीचरुस्थालीसंमार्जनकुशाः उपयमनकुशाः प्रादेशमितपालाशःसमि
धस्त्रयंस्रुवः आज्यंषट्पंचाशदुत्तरयजमानमुष्टिशतद्वयावछिन्नं तंदुलपू
र्णपात्रंतिलमुद्गमिश्रास्तंडुलाः पूर्णपात्रं एतानिपवित्रछेदनकुशानांपूर्वपूर्वदिशि
क्रमेणसादनीयानितदुत्तरतः वीणागाथिनोप्रादेशमात्रसाम्नाश्वत्थशंकुः श्वे
तशल्लकीकंटकं पीतसूत्रपूर्णस्तर्कुः दर्भपिंजुलिकात्रयं उदुंबरयुग्मफलसवर्ण
घटितदेवकर्करादियुक्तास्त्रग्गेरकउष्णबिल्वादिफलयुतवाराष्टत्तयादिश्चन्यथ
थावारपरिज्ञातद्रव्यमासादनीयं ततः पवित्रछेदनार्थकुशैः प्रादेशमितपवि
त्रेछित्वा सपवित्रयापाणिनाप्रणीतोदकं त्रिःप्रोक्षणीपात्रे कृत्वा अनामिकांगुष्ठा
भ्यामुत्तराग्रेपवित्रेगृहीत्वा त्रिरुद्दिंगनं प्रणीतोदकेनप्रोक्षणीप्रोक्षणं ततः प्रोक्षणी
जलेनयथासादितद्रव्यसेचनं ततोग्निप्रणीतयोर्मध्येप्रोक्षणीपात्रंनिधानंततः ५
आज्यस्थाल्यामाज्यनिर्वापः चरौतुतिलतंडुलमुद्गानांप्रणीतोदकेनत्रिःप्रक्षा
ल्यः तत्रकिंचिज्जलंदत्वाप्रक्षेपः ततःस्रुवंसंगृहीत्वा प्रणम्याचाज्यंप्रतापयित्वा

वन्हिरुत्तरतश्चरुंदक्षिणतः आज्यंयथापत्तुनिदध्यात् ततःसिद्धेचरौज्वलत्तृणंप्र
द०क० दक्षिणंभ्रामयित्वा वह्नौतत्प्रक्षेपः ततःश्रुवप्रतपनंत्रिः ततः संमार्जनकुशानामग्रै
६ रंतरतोमूलैर्बाह्यतः श्रुवंसंमृज्यप्रणीतोदकेनाभ्युक्ष्यपुनस्त्रिःप्रतप्यदक्षिणतोनि
दध्यात् ततःआज्यमग्नितश्चरोःपूर्वेणानीयाग्रेधृत्वाआज्यपश्चिमेनचरुमानीया
ज्यस्योत्तरतोनिदध्यात् ततःआज्यप्रोक्षणीवदुत्पवनं अवेक्ष्यसत्यपस्व्येतन्नि
रसनंततः पूर्ववत्प्रोक्षण्युत्पवनं ततउत्थायोपयमनकुशानादायप्रजापतिंमन
साध्यात्वातूष्णीमग्नौक्षिपेत् समिधःस्ततःकाः अथोपविश्यसपवित्रप्रोक्षणी
जलेनाग्निंप्रदक्षिणक्रमेणपर्युक्ष्य प्रणीतापात्रेपवित्रेधृत्वाब्राह्मणारब्धः
पातितदक्षिणजानुर्जुहुयात् ततश्चाघाराविचतस्थेप्रत्याहुत्यनंतरंहुतशेषस्य
घृतस्यप्रोक्षणीपात्रेप्रक्षेपः ततःसमिद्धतमेऽग्नौ ॐप्रजापतयेस्वाहा इदंप्रजाप
तये इतिमनसा ॐइंद्रायस्वाहा इदमिंद्राय इत्याघारौ अग्नयेस्वाहा इदमग्नये
ॐसोमायस्वाहा इदंसोमाय इत्याज्यभागौ ततोन्वारब्धस्थालीपाकेनहोमः ६
ॐप्रजापतयेस्वाहा इदंप्रजापतये इतिमनसा ततोनन्वारब्धोजुहुयात् ततः

ह.क. ८

इत्यनंतरंअवावस्थितहुतशेषस्यप्रोक्षण्यांप्रक्षेपः तत्रैवाज्यस्थालीपाकाभ्यां
स्विष्टकृद्धोमः ॐअग्नयेस्विष्टकृतेस्वाहा इदमग्नयेस्विष्टकृते ॐभूःस्वाहा इदंभूः
ॐभुवःस्वाहा इदंभुवः ॐस्वःस्वाहा इदंस्वः एतामहाव्याहृतयः ॐत्वन्नोअग्ने
वरुणस्यविद्वान्देवस्यहेडोअवयासिसीष्ठाः यजिष्ठोवह्नितमः शोशुचानो
विश्वाद्वेषाꣳसिप्रमुमुग्ध्यस्मत्स्वाहा इदमग्निवरुणाभ्यां ॐसत्वन्नोअग्नेव
मोभवोतीनेदिष्ठोअस्याउषसोव्युष्टौअवयक्ष्वनोवरुणꣳरराणोवीहिमृडी
कꣳसुहवोनएधिस्वाहा इदमग्निवरुणाभ्यां ॐअयाग्नेस्यनभिशस्ति
पाश्चसत्वमित्वमयाअसिअयानोयज्ञंवहास्ययानोधेहिभेषजं ॐस्वाहा
इदमग्नये ॐयेतेशतंवरुणयेसहस्रंयज्ञियाः पाशावितताममहांतः तेभि
र्नोअद्यसवितोतविष्णुर्विश्वेमुंचंतुमरुतःस्वर्काः स्वाहा इदंवरुणायसवित्रे
विष्णवेविश्वेभ्योदेवेभ्योमरुद्भ्यः स्वर्केभ्यः ॐउदुत्तमंवरुणपाशमस्मद ८
वाधमंविमध्यमꣳश्रथायअथावयमादित्यव्रतेतवानागसोअदितये
स्यामस्वाहा इदंवरुणाय इतिसर्वप्रायश्चित्तं ॐप्रजापतयेस्वाहा इदंप्रजाप

Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

स्क·
८
तये इतिप्राजापत्यं अथसंस्रवप्राशनं ततः आचम्य ॐअद्यसीमंतोन्नयन
होमकर्मणिकृताकृतावेक्षणरूपब्रह्मकर्मप्रतिष्ठार्थमिदंपूर्णपात्रंप्रजाप
तिदैवतममुकगोत्रायामुकशर्मणेब्राह्मणायब्राह्मणंदक्षिणांतुभ्यमहंसं
प्रददे ॐस्वस्तीतिप्रतिवचनं ततोब्रह्मग्रंथिविमोकः ततः ॐसुमित्रिया
नआपओषधयः संतुइतिपवित्राभ्यांप्रणीताजलेनशिरः संमृज्य ॐदुर्मि
त्रियास्तस्मैसंतुयोस्मान्द्वेष्टियंचवयंद्विष्मः इत्यैशान्यांप्रणीतान्युब्जीकर
णंततस्तरणक्रमेणबर्हिरन्यस्याभ्याज्येनाभिधार्य ॐदेवागातुविदोगातु
वित्वागातुमितमनसस्पतइमंदेवयज्ञंस्वाहावातेधाःस्वाहा इति
मंत्रेणबर्हिर्होमः ततः पश्चादग्नेर्वधूमहतेवाससीपरिधाप्यभद्रासने
उपवेशयेत् ततस्त्रिश्वेतशल्लकीकंटकाश्वत्थशंकपीततंतुतर्कदर्भ
पिंजुलीत्रितयउदुंबरफलयुग्मान्वितप्रादेशमिनाशाखाभिर्वर्तुलीकृ ८
त्यसीमंतमूर्द्धनिविनयति ॐभूर्भुवःस्वर्विनयामीति इतिमंत्रेणसकृत्
ॐभूर्विनयामी ॐभुवः विनयामि ॐस्वर्विनयामि इतिमंत्रेणवारत्रयंततः

उदुंबरफलयुग्मान्वितशल्लकीकंटकादिपंचकंवधूसीमंतदक्षिणतोवेणीकृत्वाय
द.क. तिर्विभाति ॐअयमूर्जावतोवृक्षमूर्ज्जीवफलिनीभव इतिमंत्रेण ततउदुंबर
९ फलादिसमन्वितसूत्रडोरकंवधूग्रीवायां अनेनैवक्रमेणवाआचाराद्भ्री
यात् ततोबिल्वादिसमन्वितवाराष्टतयेनस्वयनं ततःफलपुष्पादिकंनूत
नवस्त्रेणवध्वाप्रतीक्षधर्त्तव्यं प्रतिसमापनेस्वामीपठनीयोमंत्रः ॐअयमूर्जेति
राजानं संगायेतामितिविशेषानंतरं सोमएवनोराजेमामानुषीःप्रजाः अवि
मुक्तचक्रआसीरंस्तीरेतभ्यम सौश्रीअमुकदेवी इतिगाथांवीणागायि
नौगायतः अन्योवावीरतरा ततोयाग्यामसन्निहितनदीतस्यानामगृ
न्हीयात् ततउत्थाय वधूदक्षिणकरेणअवस्पृष्टेनफलपुष्पसमन्वित
घृतेन ॐमूर्धानंदिवोअरतिंपृथिव्यावैश्वानरमृतआजातमग्निंकवि
छंसम्राजमतिथिंजनानामासन्नापात्रंजनयंतदेवाःस्वाहाइतिमंत्रेण
पूर्वादर्विपरायतसुपूर्णापुनरायतवस्नेवविक्रीणावहाइषमूर्जंछंशत ९
क्रतोस्वाहेत्यनेनपूर्णाहुतिंदत्वोपविश्यस्रुवेणभस्मानीयदक्षिणाकराना

Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

मिकाग्रगृहीतभस्मना ॐत्र्यायुषंजमदग्नेरितिललाटे ॐकश्यपस्यत्र्यायुषमि
द.का तिग्रीवायां ॐयद्देवेषुत्र्यायुषमिति दक्षिणबाहुमूले तन्नोअस्तुत्र्यायुषमिति
१० हृदि इतित्र्यायुषंकुर्यात् अनेनैवक्रमेणवध्वाअपित्र्यायुषंकुर्यात् तत्रनमे
अस्तुत्र्यायुषं इतिविशेषः ततोब्राह्मणभोजनं इतिसीमंतकर्म ३ अथजा
तकर्म तत्रप्रथमंशूलवतीमद्भिः परिषिंचति ॐएजतुदशमास्योगर्भोज
रायुणासहयथायंवायुरेजतियथासमुद्रएजतिएवायंदशमास्यो
अस्त्रंजरायुणासह इतिमंत्रेण ततोवधूसमीपेयतिजेयति ॐअवैतुपृश्नि
शेवलंशुनेजराय्वत्तवेनेवमांसेनपीवरींनकस्मिंश्चनायतमवजरा
युपद्यतामिति ततःपुत्रेजातेनाभिवर्धनीत्प्राक्कृताभ्युदयिकः कुमारंदक्षि
णकरस्यानामिकयासुवर्णेनदधिमधुघृतेएकीकृत्यघृतमेववाप्राश
यति ॐभूस्त्वयिदधामि ॐभुवस्त्वयिदधामि ॐस्वस्त्वयिदधामि ॐभूर्भुवः १०
स्वस्त्वयिदधामि इतिमंत्रेण एतन्मेधाजननं ततः कुमारस्यदक्षिणकर्णे
नाभ्यां वामुखंदत्वा ॐअग्निरायुष्मान्सवनस्पतिभिरायुष्मान्तेनत्वायुषायुष्मा

करोमि १ ॐसोमआयुष्मान्सओषधीभिरायुष्मान्स्तेनत्वायुषायुष्मंतंकरोमि
दृ.का. ११ २ ॐब्रह्मायुष्मान्ब्राह्मणैरायुष्मनेनत्वायुषायुष्मंतंकरोमि ३ ॐदेवाआयुष्मं
तस्तेऽमृतेनायुष्मंतस्तेनत्वायुषायुष्मंतंकरोमि ४ ॐऋषयआयुष्मंतः तेव्रते
रायुष्मंतस्तेनत्वा युषायुष्मंतस्तेनत्वायुषायुष्मंतंकरोमि ५ ॐपितरआयु
ष्मंतस्तेस्वधाभिरायुष्मंतस्तेनत्वायुषायुष्मंतंकरोमि ६ ॐयज्ञआयुष्मान्सद
दक्षिणाभिरायुष्मान्स्तेनत्वायुषायुष्मंतंकरोमि ७ ॐसमुद्रआयुष्मान्संस्रव
तीभिरायुष्मांस्तेनत्वायुषायुष्मंतंकरोमि ८ इतित्रिर्जपित्वा ॐत्र्यायुषंजमद
ग्नेः कश्यपस्यत्र्यायुषं यद्देवेषुत्र्यायुषंतन्नोअस्तुत्र्यायुषं इतित्रिर्जपित्वा ॥
अथतस्यदीर्घमायुः कामयमानः पुत्रमभिस्पृशन्काकजपतिस्वचायं ॐदि
वस्परिप्रथमंजज्ञेअग्निरस्मद्द्वितीयंपरिजातवेदाः तृतीयमप्सुनृमणाअजस्र
मिंधानएनंरजतेस्वाधीः १ विद्यातेअग्नेत्रेधात्रयाणिविद्यातेधामविभृतापुरु
त्राविद्यातेनामपरमंगुहायद्विद्यातमुत्संयतआजगंथ २ समुद्रेत्वानृमणाअप्स्व ११
ंतर्नृचक्षाईधेदिवोअग्नऊधन् तृतीयेत्वारजसितस्थिवांसमपामुपस्थेम

ह·क· १२ हिषाअवर्द्धन् ३ अक्रंददग्निः स्तनयन्निवद्यौः क्षामारेरिहद्वीरुधःसमंजन्स
द्योजज्ञानोविहीमिद्धोअख्यदारोदसीभानुनाभात्यंतः ४ श्रीणामुदारोधरुणोरयीणां
मनीषाणांप्रार्पणःसोमगोपाःवसुःसूनुःसहसोअप्सुराजाविभात्यग्रउषसामि
धानः ५ ॐविश्वस्यकेतुर्भुवनस्यगर्भआरोदसीअपृणाज्जायमानः वीडुंचिद
द्रिमभिनत्परायंजनायदग्निमयजंतपंच ६ ॐउशिक्पावकोअरतिःसुमेधा
मर्त्येष्वग्निरमृतोनिधायिइयर्तिधूममरुषंभरिभ्रदुच्छुक्रेणशोचिषाद्यामिनक्ष
न् ७ ॐदृशानोरुक्मउर्व्याव्यद्यौद्दुर्मर्षमायुःश्रियेरुचानः अग्निरमृतोअभव
द्वयोभिर्यदेनंद्यौरजनयत्सुरेताः ८ ॐयस्तेअद्यकृणवद्भद्रशोचेअपूपंदेव घृत
वंतमग्नेप्रतंनयप्रतरंवस्यो अच्छाभिसुम्नंदेवभक्तंयविष्ठ ९ ॐआतंभजसौ
श्रवसेष्वग्नउक्थउक्थआभजशस्यमानेप्रियः सूर्येप्रियोअग्नाभवात्युज्जा
तेनभिनददुज्जनित्वैः १० ॐत्वामग्नेयजमानाअनुद्यून्विश्वावसुदधिरेवा
र्याणित्वयासहद्रविणमिच्छमानाव्रजंगोमंतमुशिजोविवव्रुः ततःकुमारं॥ १२
प्रतिदिशमेकैकंब्राह्मणंमध्येपंचमंऊर्ध्वमवेक्षमाणमवस्थाप्यतमुच्छिष्टेनमम

प्राणेनेतिपिताब्रूयात्ततस्तेषुप्राणेतिपूर्वोव्यानेनेतिदक्षिणोऽपानेनेत्यपर
द॰क॰ उदानेति उत्तरस्तउपरिष्टादवेक्ष्यमाणः समानेतिपंचमोब्रूयात् एषामसंभवेस्वय
१३ मेवतत्त्रोपविश्यतथैवब्रूयात् एषामसंभवेस्वयमेव अथकुमारस्यजन्म
भूमिमभिमंत्रयेत् ॐवेदतेभूमिहृदयंदिविचंद्रमसिश्रितंवेदाहंतन्मांतद्विद्या
त्पश्येमशरदः शतंजीवेमशरदः शतंशृणुयामशरदः शतमित्यनेन अथ
कुमारमभिमृशति अश्माभव परशुर्भव हिरण्यमस्रुतंभव आत्मावैपुत्रनामा
सित्वंजीवमशरदः शतमित्यनेन ततःकुमारमातरमभिमंत्रयेत् इडासिमै
त्रावरुणीवीरेवीरमजीजनथाः सात्वंवीरवतीभवयास्मान्वीरवतोकरत् इत्य
नेन ततःकुमारनाभिवर्द्धनेकृतेतस्यादक्षिणस्तनंप्रक्षाल्यकुमारस्यप्रयच्छति
ॐइमंस्तनमूर्जस्वंतंधयापांप्रपीनमग्नेसरीरस्यमध्येउत्संजुषस्वमधुमं
तमर्वन्तसमुद्रियंसदनमाविशस्वइतिमंत्रेण ततोवामस्तनंप्रक्षाल्यप्रयच्छ
ति ॐइमंस्तनमित्यादि यस्तेस्तनः शशयोयोमयोभूर्योरत्नधावसुविद्यः
सुदत्रः येनविश्वापुष्यसिवार्याणिसरस्वतितमिहधातवेकः इतिमंत्राभ्याम्

ह.क. ततः प्रभाविनीशायनीयः मस्तकोपरिमृत्पैंवारिपूर्णभाजनंनिदध्यात् त्रयोदेवेषु
१५ जाग्रथयथादेवेषुजाग्रथएवमस्यांसूतिकायांसुपत्रियांजाग्रथेत्यनेनमंत्रेण
तच्चसूतिकोत्थापनपर्यंतंतत्रैवधर्तव्यं ततःसूतिकागृहद्वारप्रवेशेपंचभू
सस्कारान्कृत्वाग्नेरुपसमाधानं सचाग्निरुत्थानदिनपर्यंतंतत्रैवधर्तव्यः
तत्रचाग्नौसंध्ययोःफलीकरणतंडुलान्मिश्रान्सर्षपान् दशदिनानिपि
ता अन्योवाब्राह्मणोनित्यंहस्तेनजुहोतितत्रप्रथमाहुतौमंत्रः ॐशण्डाम
र्काभ्यांउपवीरः शौण्डिकेयउलूखलः मलिम्लुचोद्रोणेभ्यश्च्यवनोनश्यता
दितःस्वाहा इदंशण्डामर्काभ्यामुपवीरायमलिम्लुचायद्रोणेभ्यश्च्यवनाय
द्वितीयायुतौ ॐआलिखन्ननिमिषः किंवदंतउपश्रुतिर्हर्यक्षःकुंभीशत्रुःपा
त्रपाणिर्नृमणिर्हंत्रीमुखः सर्षपारुणश्च्यवनोनश्यतादितःस्वाहा इदमालि
खतेनिमिषाय किंवदंद्भ्यःउपश्रुतयेहर्यक्षायकुंभीशत्रवेपात्रपाणयेनृमणयेहंत्रीमुखा १५
यसर्षपायारुणाय अथयदिदशाहाभ्यंतरेकुमारग्रहोबालमाविशेत्तेनाविधे
ननामयतिनरोदितिनहृष्यतिनतुष्यतिचतदेतन्नैमित्तिकंकर्तव्यंतदातंबा

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

लकंजालेनाछाद्यउत्तरीयेणवाससाअंकमादायत्वंबालंपिताजपति कूर्कुरस्तु
द.क. कूर्कुरः कूर्कुरोमालवंधनः चेच्छेच्छुनकस्तजनमस्तेअस्तुसीसरोलयेनापव्द
२५ रस्तन्नयंयतेदेवावरमदद्धुः सत्वंकुमारमेववृणीथाः चेच्चेच्छुनकनमस्तेअस्तु
सीसरोलयेनापव्हरस्तन्नयं यतसरमामातासीसरः पिताश्यामवलोभ्रातरौ
चेच्चेच्छुनकस्तजनमस्तेअस्तुसीसरोलयेनापव्हरस्तत्यमिनिजयः ननामय
तिनरोदितिनहृष्यतिनग्लायतियत्रवयंवदामोयत्रनाभिमृशामभिमृश्यभि
मृशाति इतिजातकर्मः ४ अथनामकर्म अथदशमेदनिसूतिकां
चोत्थाप्यैकादशेहनिविहिन दिनांतरेवा पितानामकुर्यात् तत्रप्रथमंमातृपू
जाभ्युदयिकादिकृत्वाब्राह्मणान् भोजयेत् कुमारंसंस्नाप्य अहतवासः परि
धाप्यकृतस्वस्त्ययनंप्राङ्मुखंदक्षिणकर्णेअमुकशर्म्मासीतित्रिःश्रावयति
आयुर्वेदात्मंत्रः ॐअंगादंगादभिजानोसिहृदयादभिजायते आत्मावैपुत्रना
मासित्वंजीवशरदांशतं नामद्व्यक्षरंचतुरक्षरंसुखोद्यंशर्म्मांतंब्राह्मणस्य व २५
र्म्मांतंक्षत्रियस्यगुप्तांतंवैश्यस्यदासांतंशूद्रस्य इतिनामकर्म्म ५ अथनि

Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

ष्क्रमणं तत्रचतुर्थमासिचंद्रताराानुकूलेदिनेस्नातमलंकृतंगृहाद्बहिरानीयपि
द.क. तान्योवाब्राह्मणः सूर्य्यमुदीक्ष्यति ॐतच्चक्षुरित्यादिमंत्रेणतत्रफलपुष्पान्वित
१६ पयसाभास्करस्यार्घ्योदेयः इतिनिष्क्रमणं ६ अथान्नप्राशनं तत्रषष्ठेमासि
चंद्रतारानुकूलशुभदिनेस्नातःशुचिराचांतःशुक्लवासाःपितास्वकीयगृहेपाव
कशाण्डिकांकुर्यात् तत्रकुशेर्हस्तपरिमितचतुरस्त्रभूमिपरिसमूह्यतानेशान्यां
निक्षिप्यगोमयोदकेनोपलिप्यस्त्रुवमूलेनवाप्रादेशमात्रमुत्तरोत्तरक्रमेण
प्रागग्रंत्रिरुल्लिख्य उल्लेखनक्रमेणानामिकांगुष्ठाभ्यांमृदंसमुद्धृत्यवारिणा
तंदेशमभ्युक्ष्य कांस्यपात्रस्थंवह्निंअग्निमुपसमाधाय ॐअद्यकर्त्तव्यान्न
होमकर्म्मणिकृताकृतावेक्षणरूपब्रह्मकर्मकर्तुममुकगोत्रममुकशर्माणंब्राह्मण
मेभिःपुष्पचंदनतांबूलवासोभिर्ब्रह्मत्वेनत्वामहंवृणे इतिब्रह्माणंवृणुयात्
ॐवृतोस्मीतिब्रतिप्रतिवचनं यथाविहितंकर्मकुरुइतियजमानेनोक्ते ॐकर १६
वाणीतितेनोक्ते अग्नेर्दक्षिणतः शुद्धमासनेनिधायतदुपरिप्रागग्रान्कुशा
नास्तीर्य अग्निंप्रदक्षिणंकारयित्वा ब्रह्माणमुदङ्मुखंतत्रोपवेश्यास्मिन्नन्नप्राशने

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

द.क. १७ होमकर्मणित्वंमेब्रह्माभवेत्यभिधाय ॐभवानीतितेनोक्ते प्रणीतापात्रंपुरतःकृ
त्वावारिणापरिपूर्यकुशैराछाद्यब्रह्मणोमवलोक्याग्नेरुत्तरतो निदध्यात् ततःपरि
स्तरणं बर्हिषश्चतुर्थभागमादायाग्ने यादीशानातं ब्रह्मणोग्निपर्यंतंनैरृत्या
द्वायव्यांतंअग्नितः प्रणीतापर्यंतं ततोग्नेरुत्तरतः पश्चिमदिशिपवित्रछेदनार्थ
कुशात्रयं पवित्रकरणार्थेकुशत्रयं पवित्रकरणार्थंसाग्रमनंतर्गर्भकुशपत्र
द्वयं प्रोक्षणीपात्रं आज्यस्थालीचरुस्थाली संमार्जनकुशाऽउपयमनकुशाः
प्रादेशमितपलाशसमिधस्तिस्रः स्रुवः आज्यंपट्टयंचाशदुत्तरयजमानमु
ष्टिशतद्वयावछिन्नतंडुलपूर्णपात्रं चर्वर्थास्तंडुलाः एतानिपवित्रछेदनकुशा
नांपूर्वदिशिक्रमेणसादनीयानि ततः पवित्रछेदनकुशैर्यजमानप्रादेशमित
पवित्रछेदनंसपवित्रकरेणप्रणीतोदकंत्रिः प्रोक्षणीपात्रेनिधाय द्वाभ्याम
नामिकांगुष्ठाभ्यामुत्तराग्रेपवित्रेगृहीत्वा त्रिरुत्पवन ततः प्रोक्षणीपात्रंस
व्यहस्तेनगृहीत्वादक्षिणानामिकांगुष्ठाभ्यांपवित्रेगृहीत्वा त्रिरुत्पवन ततः १७
प्रोक्षणीपात्रंसव्यहस्तेनगृहीत्वा प्रोक्षणीजलेनासादितवस्तुसेचनं अग्नि

प्रणीतयोर्मध्ये प्रोक्षणीपात्रं निदध्यात् ततः आज्यस्थाल्यामाज्यं निरुप्य प्र
द॰ श॰ णीतोदकेन तंडुलान्प्रक्षाल्य चरुपात्रे प्रणीमोदकं कृत्वा तत्र तंडुलान्प्रक्षिप्य
१८ स्वयंचरुं गृहीत्वा ब्रह्माचारुज्यंवन्हाद्युत्तरायेचरुं दक्षिणतः आज्यंनिदध्यात्
ततःसिद्धेचरौतृणादि प्रज्वाल्य उभयोरुपरिप्रदक्षिणं भ्रामयित्वावन्हौतस्य
क्षेपः ततस्त्रिः स्रुवप्रतपनं संमार्जनकुशानामग्रैरंतरतो मूलैर्बाह्यतः स्रुवं
सम्मृज्य प्रणीतोदकेनाभ्युक्ष्य पुनस्त्रिः प्रतप्य दक्षिणतो निदध्यात् ततः आ
ज्यमग्नितश्चरोः पूर्वेणानीयाग्रे धृत्वा आज्यपश्चिमेन चरुमानीयाज्यस्यो
त्तरतो निदध्यात् ततः आज्यस्य प्रोक्षणीवत्त्रिरुत्पवनं अवेक्ष्य सत्यपद्रव्ये
तन्निरसनं ततः प्रोक्षण्युत्पवनं ततः उत्थाय उपयमनकुशान्वामहस्ते
कृत्वा प्रजापतिं मनसा ध्यात्वा तूष्णीमग्नौ घृताक्ताः समिधस्तिस्रः प्रक्षिपे
त् ततः उपविश्य सपवित्र प्रोक्षण्युदकेन प्रदक्षिणक्रमेणाग्निं पर्युक्ष्य १८
प्रणीतापात्रे निधाय ब्राह्मणान्वारब्धः पातितदक्षिणजानुः समिद्धतमेऽग्नौ
जुहुयात् तत्र प्रथममाहुति चतुष्टये तत्तदाहुत्यनंतरं स्रुवावस्थितहुतशे

Joint Project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

ह.गा.
१९

षस्य प्रोक्षणीपात्रे प्रक्षेपः ॐ प्रजापतये स्वाहा इदं प्रजापतये इति मनसा
ॐ इंद्राय स्वाहा इदमिंद्राय इत्याघारौ ॐ अग्नये स्वाहा इदमग्नये ॐ सोमाय
स्वाहा इदं सोमाय इत्याज्यभागौ ततोऽनन्वारब्धेनासाधारणाहुतिद्वयं तत्र प्र
थमाहुतिमंत्रः ॐ देवीं वाचमजनयंत देवास्तां विश्वरूपाः पशवो वदंति
सा नो मंद्रेषमूर्जं दुहाना धेनुर्वागस्मानुप सुष्टुतैतु स्वाहा इदं वाचे द्वितीया
हुतिस्तु ॐ देवीं वाचमित्यादि मंत्रः ॐ वाजो नो अद्य प्र सुवाति दानं वाजो दे
वाँ ऋतुभिः कल्पयाति वाजो हि मा सर्ववीरं जजान विश्वा आशा वाजपति
र्जयेयं स्वाहा इदं वाचे वाजाय इति मंत्राभ्यां ततः स्थालीपाकेनाहुतिच
तुष्टयं ॐ प्राणेनान्नमशीय स्वाहा इदं प्राणाय ॐ अपानेन गंधमशीय स्वाहा इदम
पानाय ॐ चक्षुषा रूपाण्यशीय स्वाहा इदं चक्षुषे ॐ श्रोत्रेण यशोऽशीय स्वाहा
इदं श्रोत्राय ततो ब्रह्मणा प्रारब्धकर्तृको होमः तत्र तत्पदाहुत्यनंतरं स्रुवाव
स्थित हुतशेषद्रव्यस्य प्रोक्षणीपात्रे प्रक्षेपः तत्रैवाज्यस्थालीपाकाभ्यां स्वि
ष्टकृत ॐ अग्नये स्विष्टकृते स्वाहा इदमग्नये स्विष्टकृते ततः आज्येन ॐ भूः स्वा

१९

## मूळ प्रत पाहण्यासाठी संपर्क


**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**

राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)

**दूरध्वनी क्रमांक** (०२५६२) २३३८४८

**Email ID** : rajwademandaldhule@gmail.com